# ॥ वाल्मीकि रामायण ॥

## ६ युद्धकाण्ड

### अध्याय ३

सुग्रीवस्य वचः श्रुत्वा हेतुमत्परमार्थवित् ।
प्रतिजग्राह काकुत्स्थो हनूमन्तमथाब्रवीत् ॥ १ ॥

तरसा सेतुबन्धेन सागरोच्छोषणेन वा ।
सर्वथा सुसमर्थोऽस्मि सागरस्यास्य लङ्घने ॥ २ ॥

कति दुर्गाणि दुर्गाया लङ्कायास्तद्ब्रवीहि मे ।
ज्ञातुमिच्छामि तत्सर्वं दर्शनादिव वानर ॥ ३ ॥

बलस्य परिमाणं च द्वारदुर्गक्रियाम् अपि ।
गुप्ति कर्म च लङ्काया रक्षसां सदनानि च ॥ ४ ॥

यथासुखं यथावच्च लङ्कायामसि दृष्टवान् ।
सरमाचक्ष्व तत्त्वेन सर्वथा कुशलो ह्यसि ॥ ५ ॥

श्रुत्वा रामस्य वचनं हनूमान्मारुतात्मजः ।
वाक्यं वाक्यविदां श्रेष्ठो रामं पुनरथाब्रवीत् ॥ ६ ॥

श्रूयतां सर्वमाख्यास्ये दुर्गकर्मविधानतः ।
गुप्ता पुरी यथा लङ्का रक्षिता च यथा बलैः ॥ ७ ॥

परां समृद्धिं लङ्कायाः सागरस्य च भीमताम् ।
विभागं च बलौघस्य निर्देशं वाहनस्य च ॥ ८ ॥

प्रहृष्टा मुदिता लङ्का मत्तद्विपसमाकुला ।
महती रथसम्पूर्णा रक्षोगणसमाकुला ॥ ९ ॥

दृढबद्धकवाटानि महापरिघवन्ति च ।
द्वाराणि विपुलान्यस्याश्चत्वारि सुमहान्ति च ॥ १० ॥

वप्रेषूपलयन्त्राणि बलवन्ति महान्ति च ।
आगतं परसैन्यं तैस्तत्र प्रतिनिवार्यते ॥ ११ ॥

द्वारेषु संस्कृता भीमाः कालायसमयाः शिताः ।
शतशो रोचिता वीरैः शतघ्न्यो रक्षसां गणैः ॥ १२ ॥

सौवर्णश्च महांस्तस्याः प्राकारो दुष्प्रधर्षणः ।
मणिविद्रुमवैदूर्यमुक्ताविचरितान्तरः ॥ १३ ॥

सर्वतश्च महाभीमाः शीततोया महाशुभाः ।
अगाधा ग्राहवत्यश्च परिखा मीनसेविताः ॥ १४ ॥

द्वारेषु तासां चत्वारः सङ्क्रमाः परमायताः ।
यन्त्रैरुपेता बहुभिर्महद्भिर्दृढसन्धिभिः ॥ १५ ॥

त्रायन्ते सङ्क्रमास्तत्र परसैन्यागमे सति ।
यन्त्रैस्तैरवकीर्यन्ते परिखासु समन्ततः ॥ १६ ॥

एकस्त्वकम्प्यो बलवान्सङ्क्रमः सुमहादृढः ।
काञ्चनैर्बहुभिः स्तम्भैर्वेदिकाभिश्च शोभितः ॥ १७ ॥

स्वयं प्रकृतिसम्पन्नो युयुत्सू राम रावणः ।
उत्थितश्चाप्रमत्तश्च बलानामनुदर्शने ॥ १८ ॥

लङ्का पुरी निरालम्बा देवदुर्गा भयावहा ।
नादेयं पार्वतं वन्यं कृत्रिमं च चतुर्विधम् ॥ १९ ॥

स्थिता पारे समुद्रस्य दूरपारस्य राघव ।
नौपथश्चापि नास्त्यत्र निरादेशश्च सर्वतः ॥ २० ॥

शैलाग्रे रचिता दुर्गा सा पूर्देवपुरोपमा ।
वाजिवारणसम्पूर्णा लङ्का परमदुर्जया ॥ २१ ॥

परिघाश्च शतघ्न्यश्च यन्त्राणि विविधानि च ।
शोभयन्ति पुरीं लङ्कां रावणस्य दुरात्मनः ॥ २२ ॥

अयुतं रक्षसामत्र पश्चिमद्वारमाश्रितम् ।
शूलहस्ता दुराधर्षाः सर्वे खड्गाग्रयोधिनः ॥ २३ ॥

नियुतं रक्षसामत्र दक्षिणद्वारमाश्रितम् ।
चतुरङ्गेण सैन्येन योधास्तत्राप्यनुत्तमाः ॥ २४ ॥

प्रयुतं रक्षसामत्र पूर्वद्वारं समाश्रितम् ।
चर्मखड्गधराः सर्वे तथा सर्वास्त्रकोविदाः ॥ २५ ॥

अर्बुदं रक्षसामत्र उत्तरद्वारमाश्रितम् ।

रथिनश्चाश्ववाहाश्च कुलपुत्राः सुपूजिताः ॥ २६ ॥

शतं शतसहस्राणां मध्यमं गुल्ममाश्रितम् ।
यातुधाना दुराधर्षाः साग्रकोटिश्च रक्षसाम् ॥ २७ ॥

ते मया सङ्क्रमा भग्नाः परिखाश्चावपूरिताः ।
दग्धा च नगरी लङ्का प्राकाराश्चावसादिताः ॥ २८ ॥

येन केन तु मार्गेण तराम वरुणालयम् ।
हतेति नगरी लङ्कां वानरैरवधार्यताम् ॥ २९ ॥

अङ्गदो द्विविदो मैन्दो जाम्बवान्पनसो नलः ।
नीलः सेनापतिश्चैव बलशेषेण किं तव ॥ ३० ॥

प्लवमाना हि गत्वा तां रावणस्य महापुरीम् ।
सप्रकारां सभवनामानयिष्यन्ति मैथिलीम् ॥ ३१ ॥

एवमाज्ञापय क्षिप्रं बलानां सर्वसङ्ग्रहम् ।
मुहूर्तेन तु युक्तेन प्रस्थानमभिरोचय ॥ ३२ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com